2211

AHNIKA PANCHA DEVA PUJAPADDHATI

RSVL
2211

RC

MURUGAN BINDING WORKS,
University Binders & Printers,
No. 3. Bomihulu Iyer, Street,
MADRAS-1.

2211

मिथिला-ग्रन्थमालायाः (१६) उनविंशतिः प्रसूनम्

A 20

अथ

आह्निकपञ्चदेवपूजापद्धतिः

प० श्रीरामचन्द्रझा व्याकरणाचार्येण सङ्कलिता

प्रकाशकः—चौखम्बासंस्कृत-पुस्तकालय, बनारस ।

सं० २००४] मू० -) [१६४७ ई०

TIRUPATI VIDYA PEETH SANSKRIT LIBRARY.

QA2 .4 .192
N47

आह्निकपञ्चदेवपूजापद्धतिः

अथ पञ्चदेवतापूजा।

अक्षतान्यादाय — ॐ भूर्भुवः स्वः श्रीसूर्यादिपञ्चदेवता इहाऽऽगच्छत इह तिष्ठत, इत्यावाह्य जलं गृहीत्वा–एतानि पाद्यार्घाचमनीय–स्नानीय–पुनराचमनीयानि ॐ श्रीसूर्यादिपञ्चदेवताभ्यो नमः। ततश्चन्दनं गृहीत्वा–इदमनुलेपनम् ॐ श्रीसूर्यादिपञ्चदेवताभ्यो नमः। ततोऽक्षतं गृहीत्वा–इदमक्षतम् ॐ श्रीसूर्यादिपञ्चदेवताभ्यो नमः। ततो जलं गृहीत्वा–एतानि गन्ध–पुष्प–धूप–दीप–ताम्बूल–यथाभागनानाविधिनैवेद्यानि ॐ श्रीसूर्यादिपञ्चदेवताभ्यो नमः। पुनः जलं गृहीत्वा–इदमाचमनीयम् ॐ श्रीसूर्यादिपञ्चदेवताभ्यो नमः। ततः पुष्पाञ्जलिः–

एष पुष्पाञ्जलिः ॐ श्रीसूर्यादिपञ्चदेवताभ्यो नमः ।

अथ विष्णुपूजा

ॐ ध्येयः सदा सवितृमण्डलमध्यवर्त्ती, नारायणः सरसिजासनसन्निविष्टः । केयूरवान् कनककुण्डलवान् किरिटी, हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ इति विष्णुं ध्यात्वा (शालग्रामशिलाऽभावे यव-तिलान्यादाय-ॐ भूर्भुवः स्वः भगवन् श्रीविष्णो इहागच्छ इह तिष्ठ, इत्यावाह्य) शङ्खस्थ-दूर्वाऽक्षत-तुलीपत्र जलान्यादाय—

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳ सर्वत-स्पृत्वाऽत्यतिष्ठद्दशाङ्गलम् पुरुष एवेदꣳ सर्वं यद् भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति एतावानस्य महिमाऽतो ज्यायाꣳश्च पूरुषः । पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि त्रिपादूर्ध्व

उदैत् पुरुषः पादोऽस्येहा भवत्पुनः । ततो विष्वङ् व्यक्रामत् साशनानशने अभि ततो विराडजायत विराजो अधिपूरुषः । स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः तस्माद् यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् । पशुंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये तस्मात् यज्ञात् सर्वहुतः ऋचः सामानि यज्ञिरे छन्दाꣳसि यज्ञिरे तस्माद् यजुस्तस्मादजायत तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत् किम्बाहू किमूरू पादा उच्येते ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ऊरू तदस्य यद् वैश्यः पद्भ्याꣳ शूद्रो अजायत चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथालोकां २ अकल्पयन् यत् पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः सप्ता-

स्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्न-
न् पुरुषं पशुम् यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

इति पुरुषसूक्तं पठन् शालग्रामोपरि स्नपनं कुर्यात् । ततः पुनरपि जलं गृहीत्वा-एतानि पाद्यार्घाचमनीय-स्नानीय-पुनराचमनीयानि ॐ भगवते श्रीविष्णवे नमः । ततः एते यवतिलाः, ॐ भगवते श्री विष्णवे नमः। एतानि पुष्पाणि ॐ भगवते श्रीविष्णवे नमः । ततः—ॐ विष्णोररराटमास विष्णोः श्नप्त्रे स्थो विष्णोः स्युरासि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे त्वा ॥ (इति पठित्वा) एतानि तुलसीपत्राणि ॐ भगवते श्रीत्रिष्णवे नमः । एष धूपः, एष दीपः, एतानियथाभागनानाविधिनैवेद्यानि , एष पुष्पाञ्जलिः ॐ भगवते श्रीविष्णवे नमः ।

अथ पार्थिवशिवलिङ्गपूजा

तत्र प्रथमं कीर्तिमुखपूजा । तद्यथा-ॐ भगवन् कीर्तिमुख इहागच्छ इह तिष्ठ, इत्यावाह्य, एतानि पाद्यार्घाचमनीय-स्नानीय-पुनराचमनीयानि ॐ कीर्तिमुखाय नमः । एवं चन्दनादिना पञ्चोपचारैः पूजयेत् ।

ततः-ॐ हराय नमः । ॐ महेश्वराय नमः । ॐ शूलपाणेय नमः । ॐ शूलपाणे इह सुप्रतिष्ठितो भव । इति पठित्वा पूजाभाजने शिवलिङ्गं संस्थाप्य, अक्षतान्यादाय-ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु विश्वेदवा स इह मादयन्तामोꣳ३ प्रतिष्ठ । इति पठित्वा-ॐ गौरीशङ्करावेहागच्छतम्, इह तिष्ठतम् । इत्यावाह्य, जलं गृहीत्वा-एतानि पाद्यार्घाचमनीय-स्नानीय-पुनराचमनी-

यानि ॐ गौरीशङ्कराभ्यां नमः । ततः—इदमनुलेपनम् ॐ गौरीशङ्कराभ्यां नमः । इदमक्षतम् ॐ गौरीशङ्कराभ्यां नमः । एतानि पुष्पाणि, एतानि बिल्वपत्राणि, एतानि यथाभागनानाविधिनैवेद्यानि, इदमाचमनीयम्—ॐ गौरीशङ्कराभ्यां नमः । ततः—ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ (इति ध्यात्वा) एष पुष्पाञ्जलिः ॐ गौरीशङ्कराभ्यां नमः ।

2211

अथ ब्रह्मपूजा

सा च सर्वदेवपूजोपकरणद्रव्यैः प्रतिपत्तिरूपेण—"ॐ ब्रह्मणे नमः" इति भूमौ पूजा कार्या । पूजान्ते अमन्त्रकैव

2241

ब्रह्मपूजनम् । तथा च ब्रह्मवैवर्त्ते–"तव मन्त्रं न गृह्णन्ति कदापि वेश्याऽभिशापतः । यदन्यदेवपूजायां तव पूजा भविष्यति ॥" इति ।

अथ विसर्जनम् ।

ॐ सूर्यादिपञ्चदेवताः ! पूजिता स्थ क्षमध्वं, स्वस्थानं गच्छत । ॐ भगवन् विष्णो ! पूजितोऽसि प्रसीद क्षमस्व (शालग्रामशिलाऽभावे तु––"स्वस्थानं गच्छ" इत्यन्ते योज्यम्) । ॐ कीर्तिमुख ! पूजितोऽसि प्रसीद क्षमस्व, स्वस्थानं गच्छ । ॐ गौरीशङ्करौ पूजितौ स्थ क्षमेथाम् , स्वस्थानं गच्छतम् । ॐ ब्रह्मन् पूजितोऽसि प्रसीद क्षमस्व, स्वस्थानं गच्छ ।

विष्णोः पादोदकग्रहणमन्त्रः–"ॐ अकालमृत्युहरणं सर्वव्याधिविनाशनम् । विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ।"

मुद्रकः—विद्याविलास प्रेस, बनारस सिटी । १……

R
S
V
L
02211

VERIFIED-2001

